# shrIhariharaputra shAstA shabarigirIshAbhinna pUjA vidhi

# श्रीहरिहरपुत्र अथवा शास्ता अथवा शबरिगिरीशाभिन्न पूजा विधि

## Document Information

Text title : hariharaputrapUjAkalpaH

File name : hariharaputrapuujaakalpah.itx

Category : pUjA, deities_misc, ayyappa, svara

Location : doc_deities_misc

Transliterated by : Antaratma antaratma at Safe-mail.net

Proofread by : Antaratma, PSA Easwaran

Latest update : July 10, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# श्रीहरिहरपुत्र अथवा शास्ता अथवा शबरिगिरीशाभिन्न पूजा विधि

अविघ्नमस्तु ।
पूजा स्थले ।
शुभे स्थाने सुरम्ये गृहे तोरणाद्यलङ्कृते कदलीस्तम्भमण्डिते
सुधूपद्रव्यधूपिते सुदीपप्रकाशाढ्येस्वासने पूजामारभेत ॥

चतुरस्रचतुर्हस्तवेदिकायां त्रयाष्टदळरङ्गवल्ल्यङ्कृतपीठं
निधाय, मध्ये अष्टदळोपरि महाभद्रदीपं स्थापयेत् ।
वामभागे श्रीमहागणपति, दक्षिणभागे दुर्गापरमेश्वरीच,
आवाहनदीपे स्थापयेत् ।
गन्धपुष्पकुङ्कुमादिभिरलङ्कृत्य पूजामारभेत ।
पूर्वे पुण्याहवाचनं कृत्वा ।

## १. अनुज्ञा ॥

ॐ सर्वेभ्यो गुरुभ्यो नमः ।
ॐ सर्वेभ्यो देवेभ्यो नमः ।
ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमः ॥

प्रारम्भकार्यं निर्विघ्नमस्तु । शुभं शोभनमस्तु ।
इष्टदेवता कुलदेवता सुप्रसन्ना वरदा भवतु ॥

अनुज्ञां देहि ॥

## २.१. आचम्य ॥

ॐ अच्युताय नमः । ॐ अनन्ताय नमः । ॐ गोविन्दाय नमः ॥

## २.२. अङ्गवन्दनम् ॥

केशव । नारायण । माधव । गोविन्द । विष्णो । मधुसूदन ।
त्रिविक्रम । वामन । श्रीधर । हृषीकेश । पद्मनाभ । दामोदर ॥

पवित्रं धृत्वा दर्भेष्वासीनः ॥

## ३. प्राणायामः ॥

ॐ प्रणवस्य परब्रह्म ऋषिः ।
परमात्मा देवता । देवी गायत्री छन्दः प्राणायामे विनियोगः ।
अथ प्राणायामः ।
ॐ भूः । ॐ भुवः । ॐ स्वः । ॐ महः । ॐ जनः ं तपः । औँ सत्यम् ।
ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमही । धियो यो नः प्रचोदयात् ॥

ॐ आपोज्योतीरसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम् ॥

## ४. सङ्कल्पः ॥

ममोपात्त समस्त दुरितक्षयद्वारा श्रीपरमेश्वर(वैष्णवः-श्रीमन्नारायण) प्रीत्यर्थं
तदेव लग्नं सुदिनं तदेवताराबलं चन्द्रबलं तदेव । विद्या बलं दैवबलं तदेव ।
लक्ष्मीपतेःतेंऽघ्रिऽयुगंस्मरामि ॥

शुभे शोभने मुहूर्ते अद्य ब्रह्मणोद्वितीयपरार्धे श्रीश्वेतवराहकल्पे
वैवस्वत मन्वन्तरेअष्टाविंशतितमे प्रथमे पादे जम्बूद्वीपे भारतवर्षे भरतखँडे
मेरोः दक्षिणे पार्श्वे (सम्युक्त आमेरिच/आउस्त्रलिअ देशे
ष्य्द्नेय्/Bरिस्बने/णेव् ज़ेर्सेय्/ळोस् आन्गेलेस् पट्टणे ) शकाब्धे अस्मिन्वर्तमानेव्यवहारिके
प्रभवादीनां षष्टि संवत्सराणां मध्ये (अमुक)
नाम संवत्सरे(अमुक) अयने (अमुक) ऋतौ(अमुक) मासे (अमुक) पक्षे
(अमुक तिथि)...... आं पुण्यतिथौ, वासरः (अमुक) वासरयुक्तायां
(अमुक) नक्षत्र युक्तायां शुभयोग शुभकरण एवङ्गुणवीशेषण विशिष्टायां (अमुक तिथि)......आं पुण्यतिथौ, (अमुक)गोत्रोत्भवस्य/ (अमुक) नक्षत्रे (अमुक) राशौ
जातस्य (अमुक) नाम शर्मणः/...... नाम्न्या सहधर्मपत्नी......पुत्र......पौत्रस्य),
मम जन्माभ्यासात् जन्मप्रभृति एतत्क्षणपर्यन्तं मध्ये सम्भावितानां सर्वेषां

पापानां सद्यः अपनोदनार्थं, सह कुटुम्बस्य क्षेमस्थैर्यधैर्यवीर्यविजय-आयुरारोग्याभिवृद्ध्यर्थं धर्मार्थकाममोक्ष चतुर्विधफलपुरुषार्थसिद्ध्यर्थं महागणपतिप्रसादसिद्ध्यर्थं श्रीदुर्गापरमेश्वरीप्रसादसिद्ध्यर्थं पूर्णापुष्कलाम्बा समेत सपरिवार हरिहरपुत्रप्रसादसिद्ध्यर्थं सर्वाभीष्टसिद्ध्यर्थं, तेषां प्रसादेन शरीरे वर्तमाने वर्तिष्यमाणसकलरोगपीडापरिहारद्वारा अरोगदृढगात्रता-सिद्ध्यर्थं भूतप्रेतपिशाचादि क्षुद्रजन्तुप्रयुक्तसकलोपद्रवनिवृत्यर्थं उदरपीडा निवृत्यर्थम्मनःशान्तिसिद्ध्यर्थं, ऐहिकामुष्मिक सकलश्रेयोऽभिवृद्ध्यर्थं, शत्रुबाधा-निवृत्यर्थं, सर्वत्र जयसिद्ध्यर्थं, सत्सन्तानादिवृद्ध्यर्थं, ज्ञानवैराग्यसिद्ध्यर्थं, (पुत्रलाभसिद्ध्यर्थं/(अमुक)रोगनिवृत्यर्थं , (उत्तरफल्गुनी नक्षत्रपुण्यदिने/ ......जन्मनक्षत्रशुभदिने/(स्थिर)......वासरे/मण्डल-शबरिगिरि यात्रारम्भ) पुण्यकाले, पुराणोक्तमन्त्रैश्च श्रीरुद्रमन्त्रैश्च यथा शक्त्यायथा मिलितोपचार-पूजाद्रव्यैः ध्यानावाहनादि षोडशोपचारैः शबरिगिरीशाभिन्नपूर्णापुष्कलाम्बासमेत श्रीहरिहरपुत्र पूजां करिष्ये ॥ (द्विः)
आदौ महागणपति, श्रीदुर्गापरमेश्वरी पूजनं च करिष्ये ॥

तदङ्गत्वेन आसनादि पूर्वाङ्गपूजां च करिष्ये ॥

आसन, कलश, घण्टा, आत्म, पीठ पूजां कृत्वा ॥

दर्भान् निरस्य । अप उपस्पृश्य ।

# ५. पूर्वाङ्ग पूजा ॥

## ५.१.आसन पूजा ॥

आसनस्य महामन्त्रस्य पृथिव्या मेरुपृष्ठ ऋषिः ।
सुतलं छन्दः । कूर्मो देवता । आसने विनियोगः ॥

पृथ्वि त्वया धृता लोका त्वं विष्णुना विधृता करे ।
त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥

अर्चना ।
ॐ योगायसनाय नमः । वीरासनाय नमः । शरासनाय नमः ।
आधारशक्ति कमलासनाय नमः ॥ इति पुष्पाक्षतैः आसनमभ्यर्च्य ।

## ५.२.कलशपूजा ॥

ॐ कलशदेवताभ्यो नमः । गन्धान् धारयामि ।
गन्धस्योपरि हरिद्राकुङ्कुमं धारयामि ।
ॐ कलशदेवताभ्यो नमः । अक्षतान् समर्पयामि ।
ॐ कलशदेवताभ्यो नमः । पुष्पैः पूजयामि ।
कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥

कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा ।
ऋग्वेदश्च यजुर्वेदः सामवेदोह्यथर्वणः ॥

गङ्गेच यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥

अङ्गैश्च सहिताः सर्वे कलशन्तु समाश्रिताः ।
अत्र गायत्री सावित्री शान्तिपुष्टिकरी तथा ॥

आयान्तु सपरिवारः श्रीहरिहरपुत्रपूजार्थं दुरितक्षयकारकाः ॥

अर्चना ।
ॐ गङ्गायै नमः । यमुनायै नमः । गोदावर्यै नमः । सरस्वत्यै नमः ।
नर्मदायै नमः । सिन्धवे नमः । कावेर्यै नमः । पुष्पैः पूजयामि ॥

अस्मिन् कलशे गङ्गादि सप्ततीर्थानि आवाहयामि ॥

गन्धपुष्पधूपदीपैः सकलाराधनैः स्वर्चितम् ॥

ॐ सितासिते सरिते यत्र सङ्गते तत्राप्लुतासो दिवमुत्पतन्ति ।
ये वैतन्वं विसृजन्ति धीरास्ते जनासो अमृतत्त्वं भजन्ते ॥

॥ कलशप्रार्थनाः ॥

कलशः कीर्तिमायुष्यं प्रज्ञां मेधां श्रियं बलम् ।
योग्यतां पापहानिं च पुण्यं वृद्धिं च साधयेत् ॥

सर्वतीर्थमयो यस्मात् सर्व देवमयो यतः ।
अतः हरिप्रियोसी त्वं पूर्णकुम्भं नमोऽस्तुते ॥

कलशदेवताभ्यो नमः ।
सकलपूजार्थे अक्षतान् समर्पयामि ॥

## ५.३. शङ्खपूजा ॥

कलशोदकेन शङ्खं पूरयित्वा ॥

शङ्खे गन्धकुङ्कुमपुष्पतुलसीपत्रैरलङ्कृत्य ॥

शङ्खं चन्द्रार्कदैवतं मध्ये वरुणदेवताम् ।
पृष्ठे प्रजापतिं वन्द्यात् अग्रे गङ्गां सरस्वतीम् ॥

त्रैलोक्येयानि तीर्थानि वासुदेवस्य चाज्ञया ।
शङ्खेतिष्ठन्तु विप्रेन्द्रा तस्मात् शङ्खं प्रपूजयेत् ॥

त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ।
पूजितः सर्वदेवैश्च पाञ्चजन्य नमोऽस्तुते ॥

गर्भादेवारिनारीणां विशीर्यन्ते सहस्रधा ।
नवनादेनपाताळे पाञ्चजन्य नमोऽस्तुते ॥

अर्चना ।
ओम् । शङ्खाय नमः । धवळाय नमः । ॐ पाञ्चजन्याय नमः ।
ॐ आकाशमण्डलाकृष्ट गङ्गादि सप्ततीर्थगणं आवाहयामि ।
ॐ पाञ्चजन्याय नमः गन्धपुष्पधूपदीपैः सकलाराधनैः स्वर्चितम् ॥

ओम् । पवनराजाय विद्महे॑ पाञ्चज॒न्याय॑ धीमहि ।
तन्न॑ः शङ्खः प्रचो॒दया᳚त् ॥

शङ्खदेवताभ्यो नमः ।
सकलपूजार्थे अक्षतान् समर्पयामि ॥

## ५.४. घण्टा पूजा

ओम् । जयध्वनि मन्त्रमातः स्वाहा ।
घण्टानादं कृत्वा ।
आगमार्थं तु देवानां गमनार्थं तु राक्षसाम् ।
घण्टारवं करोम्यादौ देव आह्वानलाञ्छनम् ॥

घण्टादेवताभ्यो नमः सकलोपचारपूजार्थे अक्षतान् समर्पयामि ।

## ५.५. आत्मपूजा ॥

देहो देवालयः प्रोक्तो जीव एव सदाशिवः ।
त्यजेदज्ञाननिर्माल्यं सोऽहम्भावेन योजयेत् ॥

ओम् । आत्मने नमः । अन्तरात्मने नमः । जीवात्मने नमः ।
परमात्मने नमः ज्ञानात्मने नमः । सत्यात्मने नमः ॥

## ५.६.प्रोक्षणम् ॥

अपवित्रो पवित्रो वा सर्वावस्थाङ्गतोऽपि वा ।
यः स्मरेत् पुण्डरीकाक्षं सः बाह्याभ्यन्तरः शुचिः ॥

ॐ भूर्भुवःसुवः । ॐ भूर्भुवःसुवः । ॐ भूर्भुवःसुवः ॥

एवं शङ्ख/कलशजलेन पूजा सामाग्र्यः आत्माच सम्प्रोक्ष्याः ॥

महागणपतिपूजा ।

## ६. ॥ महागणपति पूजा ॥

गणपति आवाहनदीपं “उद्दीप्यस्व” मन्त्रेण प्रज्वाल्य ।
दीपं सम्प्रार्थ्य पीठपूजां कृत्वा,
गन्धकुङ्कुममाल्याभरणालङ्कृतदीपभूषिते
महागणपतिपूजां कुर्यात् ॥

उद्दी॑प्यस्व जातवेदोऽपघ्नन्निर्ऋ॑तिं॒ मम॑ ।
प॒शूँश्च॒ मह्य॒माव॑ह॒ जीव॑नं च॒ दिशो॑ दिश ।
मा नो॑ हिँसीः जातवेदो॒ गाम॒श्वं पु॑रुषं॒ जग॑त् ।
अबि॑भ्र॒दग्न॒ आग॑हि श्रि॒या मा॒ परि॑पालय ॥

॥ पीठपूजा ॥

ॐ सकलगुणात्मशक्तियुक्ताय योगपीठात्मने नमः ।
आधारशक्त्यै नमः । मूलप्रकृत्यै नमः ।
आदिवराहायै नमः । आदिकूर्मायै नमः ।

अनन्तासनाय नमः । अनन्तशक्तियुक्त श्रीमहागणपति योगपीठासनाय नमः । समस्तोपचारान् समर्पयामि ॥ इति पीठपूजां समर्पयामि ॥

॥ ध्यानम् ॥

ॐ गणानां त्वा गणपतिँ हवामहे
कविङ्कवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजंब्रह्मणां ब्रह्मणस्पत आ नः
शृण्वन्नूतिभिस्सीदसादनम् ॥

(गायत्री मन्त्रः)
ॐ । तत्पुरुषाय विद्महे एकदन्ताय धीमहि ।
तन्नो दन्तिः प्रचोदयात् ॥

ॐ भूर्भुवःस्वः महागणपतये नमः । ध्यायामि आवाहयामि ॥

इति मनसा सुध्यातं सपरिवारं महागणपतिं दीपे आवहयेत् ।
यन्त्रेवाविग्रहे/प्रतिमायां वा कुम्भेवा आवहयेत् प्राणप्रतिष्ठां कृत्वा - फलादिकं निवेद्य षोडशोपचारपूजां कूर्यात् ।
ॐ । श्रीमहागणपतये नमः । आसनं समर्पयामि ।
ॐ । श्रीमहागणपतये नमः । पादयोः पाद्यं समर्पयामि ।
ॐ । श्रीमहागणपतये नमः । हस्तयोः अर्घ्यं समर्पयामि ।
ॐ । श्रीमहागणपतये नमः । आचमनीयं समर्पयामि ।
ॐ । श्रीमहागणपतये नमः । स्नानं समर्पयामि ।
स्नानानन्तरं आचमनीयं समर्पयामि ।
ॐ । श्रीमहागणपतये नमः । वस्त्र-यज्ञोपवीत-उत्तरीय-आभरण-नानाभूषणालङ्कारार्थे अक्षतान् समर्पयामि ।
ॐ । श्रीमहागणपतये नमः । दिव्यपरिमळगन्धान् धारयामि ।
ॐ । श्रीमहागणपतये नमः । गन्धस्योपरि हरिद्राकुङ्कुमं धारयामि ।
ॐ । श्रीमहागणपतये नमः । अक्षतान् समर्पयामि ।
ॐ । श्रीमहागणपतये नमः । पुष्पाणि समर्पयामि ।
॥ षोडशनामावळिः ॥

ॐ सुमुखाय नमः ।
ॐ एकदन्ताय नमः ।

ॐ कपिलाय नमः ।
ॐ गजकर्णकाय नमः ।
ॐ लम्बोदराय नमः ।
ॐ विकटाय नमः ।
ॐ विघ्नराजाय नमः ।
ॐ विनायकाय नमः ।
ॐ धूमकेतवे नमः ।
ॐ गणाध्यक्षाय नमः ।
ॐ भालचन्द्राय नमः ।
ॐ गजाननाय नमः ।
ॐ वक्रतुण्डाय नमः ।
ॐ हेरम्बाय नमः ।
ॐ स्कन्दपूर्वजाय नमः ॥

ॐ श्रीमहागणपतये नमः ।
इति षोडश नामावळिः पुष्पाक्षतैश्च अर्चनपूजां समर्पयामि ॥

ततः अष्टोत्तरशतनाम अर्चनं कृत्वा ॥

धूपं आघ्रापयामि ।
दीपं दर्शयामि ।
स्थलशुद्धि । गोमयोपलेपिते चतुरश्रे स्थण्डिले गायत्र्या
गन्धपुष्पादिभिरलङ्कृत्य तस्मिन् नैवेद्यं निदध्यात् ।
ॐ भूर्भुवःसुवः तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि
धियो यो नः प्रचोदयात् । देव सवितः प्रसुव सत्यं त्वर्तेन
(रात्रौ ऋतं त्वा सत्येन ) परिषिञ्चामि । अमृतोपस्तरणमसि ।
ओम् । सपरिवाराय श्रीमहागणपतये नमः कदलीफलानि लाजान्
गुडखण्डान् (नाळिकेर खण्डद्वयं)एतद् सर्वं यथाशक्ति
महानैवेद्यं निवेदयामि । मध्ये मध्ये अमृतपानीयं समर्पयामि ।
अमृतापिधानमसि । नैवेद्यानन्तरं आचमनीयं समर्पयामि ॥

ताम्बूलं समर्पयामि ।
फलं समर्पयामि ।
दक्षिणां समर्पयामि ।

॥ नीराजनः ॥

हिरण्य पात्रं मधोः पूर्णं दधाति । मधव्योसनीति ।
एकदा यजमाण उपहरते । एकदैव यजमाण आयुस्तेजो दधाति ॥

ओम् । सपरिवाराय श्रीमहागणपतये नमः ।
सर्वोपचारर्थे कर्पूरनीराजनदीपं प्रदर्शयामि ।
रक्षां धारयामि ।
नीराजनानन्तरं आचमनीयं समर्पयामि ।
ॐ भूर्भुवस्वः महागणपतये नमः । मन्त्रपुष्पं स्वर्णपुष्पञ्च समर्पयामि ।
ॐ भूर्भुवस्वः महागणपतये नमः । प्रदक्षिणनमस्कारान् समर्पयामि ।
ॐ भूर्भुवस्वः महागणपतये नमः । छत्रचामरादि समस्तराजोपचारान्
भक्त्युपचारान् समर्पयामि ॥

॥ अथ प्रार्थना ॥

ॐ वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

नमो नमो गणेशाय नमस्ते शिवसूनवे ।
निर्विघ्नं कुरु मे देवेश नमामि त्वां गणाधिप ॥

विघ्नेश्वर महाभाग सर्वलोकनमस्कृत ।
मयाऽऽरब्धमिदं कार्यं निर्विघ्नं कुरु सर्वदा ॥

ॐ भूर्भुवस्वः महागणपतये नमः । प्रार्थनां समर्पयामि ।
अनया पूजया विघ्नहर्ता महागणपतिः प्रीयताम् ॥

श्रीमहागणपतिप्रसादं शिरसा गृह्णामि ॥

अविघ्नमस्तु ॥

## ७. ॥ श्रीदुर्गा परमेश्वरी पूजा ॥

महाभद्रदीपे दक्षिणभागे अलङ्कृतदीपं निधाय श्रीदुर्गापरमेश्वरीं
आवाहयेत् "जातवेदसे" इति मन्त्रेण दीपम्प्रज्वाल्य पीठपूजां कृत्वा
गन्धपुष्पाक्षतान् गृहीत्वा ।
॥ पीठपूजा ॥

ॐ सकलगुणात्मशक्तियुक्ताय योगपीठात्मने नमः ।
आधारशक्त्यै नमः । मूलप्रकृत्यै नमः । आदिवराहायै नमः ।
आदिकूर्मायै नमः । अनन्तासनाय नमः । अनन्तशक्तियुक्त
श्रीदुर्गापरमेश्वरी योगपीठसनाय नमः समस्तोपचारान्
समर्पयामि ॥ इति पीठपूजां समर्पयामि ॥

॥ ध्यानम् ॥

ॐ । जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः ।
सनः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरिताऽत्यग्निः ॥

ॐ कात्यायनाय विद्महे कन्याकुमारि धीमहि ।
तन्नो दुर्गिः प्रचोदयात् ॥

ॐ भूर्भुवःसुवरोम् । अस्मिन् दीपे दुर्गा परमेश्वरीं ध्यायामि आवाहयामि ॥

(चक्रेवा कुम्भेवा चित्रपठेवा बिम्बे/प्रतिमायां वा देवतां आवाहयेत् ।
प्राणप्रतिष्ठां कृत्वा त्रिमधुरं निवेद्य) ॥

ॐ श्रीदुर्गापरमेश्वर्यै नमः । रत्नखचितसिंहासनं समर्पयामि ।
ॐ श्रीदुर्गापरमेश्वर्यै नमः । पादयोः पाद्यं आसनं समर्पयामि ।
ॐ श्रीदुर्गापरमेश्वर्यै नमः । हस्तयोः अर्घ्यं समर्पयामि ।
ॐ श्रीदुर्गापरमेश्वर्यै नमः । आचमनीयं समर्पयामि ।
ॐ श्रीदुर्गापरमेश्वर्यै नमः । स्नानं समर्पयामि ।
अथवा स्नानार्थे वेदमन्त्रैश्च प्रोक्षयामि ।
आपोहिष्ठा मयो भुवः - इत्यादिभिः मन्त्रैश्च प्रोक्षयेत् ।
स्नानानन्तरं आचमनीयं समर्पयामि ।
ॐ श्रीदुर्गापरमेश्वर्यै नमः ।
एते पट्टकूल-वस्त्र-यज्ञोपवीत-उत्तरीय-स्वर्णाभरण-सौभाग्य
द्रव्य-सौभाग्य-सूत्र-कज्जल-नानाभूषणालङ्कारार्थे इमे अक्षताः ।
ॐ श्रीदुर्गापरमेश्वर्यै नमः । दिव्यपरिमळचन्दनं समर्पयामि ।
गन्धस्योपरि हरिद्राकुङ्कुमं समर्पयामि ।
ॐ श्रीदुर्गापरमेश्वर्यै नमः । अक्षतान् समर्पयामि ।
ॐ श्रीदुर्गापरमेश्वर्यै नमः । पुष्पाणि समर्पयामि ।
॥ अष्ट नामावळिः ॥

ॐ भवस्य देवस्य पत्न्यै नमः ।
ॐ शर्वस्य देवस्य पत्न्यै नमः ।
ॐ ईशानस्य देवस्य पत्न्यै नमः ।
ॐ पशुपतेः देवस्य पत्न्यै नमः ।
ॐ उग्रस्य देवस्य पत्न्यै नमः ।
ॐ रुद्रस्य देवस्य पत्न्यै नमः ।
ॐ भीमस्य देवस्य पत्न्यै नमः ।
ॐ महतो देवस्य पत्न्यै नमः ॥ ८
ॐ दुर्गापरमेश्वर्यै नमः । इति अष्टनामावळिः अर्चनपूजां समर्पयामि ॥

ततः यथावकाशं अष्टोत्तरशतनाम अर्चनं कृत्वा ॥

ॐ भूर्भुवस्सुवरोम् । दुर्गापरमेश्वर्यै नमः । धूपं आघ्रापयामि ।
ॐ श्रीदुर्गापरमेश्वर्यै नमः । दीपं सन्दर्शयामि ।
॥ नैवेद्यम् ॥

ॐ भूर्भुवःसुवः । तत्सवितुर्वरेण्यं
भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥

देवसवितः प्रसुव । सत्यं त्वर्तेन (रात्रौ ऋतन्त्वासत्येन) परिषिञ्चामि ।
अमृतोपस्तरणमसि ॥

प्राणाय स्वाहा ।
अपानाय स्वाहा ।
व्यानाय स्वाहा ।
उदानाय स्वाहा ।
समानाय स्वाहा ।
ब्रह्मणे स्वाहा ।
मधुवाता ऋतायते । मधुक्षरन्ति सिन्धवः ।
माध्वीर्नः सन्त्वोषधीः ।
मधुनक्तमुतोषसि । मधुमत् पार्थिवꣳ रजः ।
मधुद्यौरस्तु नः पिता । मधुमान्नो वनस्पतिः । मधुमाꣳ अस्तु सूर्यः ।
माध्वीर्गावो भवन्तु नः ॥ मधु मधु मधु ॥

ॐ । सपरिवाराय श्रीदुर्गापरमेश्वर्यै नमः (नैवेद्य नाम)
एतत् सर्वं यथाशक्ति महानैवेद्यं निवेदयामि ।
मध्ये मध्ये अमृतपानीयं समर्पयामि । अमृतापिधानमसि ।
हस्तप्रक्षाळन, पादप्रक्षाळन नैवेद्यानन्तरं आचमनीयञ्च समर्पयामि ॥

ॐ श्रीदुर्गापरमेश्वर्यै नमः । ताम्बूलं समर्पयामि ।
ॐ श्रीदुर्गापरमेश्वर्यै नमः । फलं समर्पयामि ।
ॐ श्रीदुर्गापरमेश्वर्यै नमः । दक्षिणां समर्पयामि ।
॥ कर्पूरनीराजनम् ॥

बहुग्वै बह्वश्वायै बह्वजाविकायै ।
बहुव्रीहियवायै बहुमाषतिलायै ।
बहुहिरन् आयै बहुहस्तिकायै ।
बहुदासपूरुषायै रयिमत्यै पुष्टिमत्यै ।
बहुरायस्पोषायै राजाऽस्तिविति ।
भूमा वै होता ।
भूमा सूतग्रामन्यः ।
भूम्नेवास्मिन्भूमानां दधाति ।
शतेन क्षत्तसङ्ग्रहीतृभिः सहोद्गाता ।
उत्तरतो दक्षिणा तिष्ठन्प्रोक्षति ॥

ॐ श्रीदुर्गापरमेश्वर्यै नमः ।
समस्तमपराधक्षमापणार्थं सर्वबाधानिवृत्त्यर्थं
सर्वमङ्गळावाप्त्यर्थं कर्पूरनीराजनदीपं प्रदर्शयामि ॥

रक्षां धारयामि ।
नीराजनानन्तरं आचमनीयं समर्पयामि ।
ॐ भूर्भुवस्वः दुर्गापरमेश्वर्यै नमः ।
मन्त्रपुष्पं स्वर्णपुष्पञ्च समर्पयामि ।
ॐ भूर्भुवस्वः दुर्गापरमेश्वर्यै नमः ।
प्रदक्षिणनमस्कारान् समर्पयामि ।
ॐ भूर्भुवस्वः दुर्गापरमेश्वर्यै नमः ।
छत्रचामरादि समस्त राजोपचारान् भक्त्युपचारान् समर्पयामि ॥

प्रदक्षिणनमस्काराश्च...... इत्यादि कूर्यात् ॥

॥ प्रार्थना ॥

सर्वमङ्गळमाङ्गल्ये शिवे सर्वार्थसाधके ।
शरण्ये त्र्यम्बके देवि नारायणि नमोऽस्तुते ॥

समस्तोपचारान् समर्पयामि ॥

श्रीदुर्गापरमेश्वरी प्रसादं शिरसा गृह्णामि ॥

श्रीदुर्गापरमेश्वरी प्रसादसिद्धिरस्तु ॥

अथ महागणपति दुर्गा परमेश्वरी आवाहितं दीपानि मध्ये
स्थितं महाभद्रदीपोपरि श्रीहरिहरपुत्रपूजां कृत्वा ।
हरिहरपुत्रपूजामारभेत ॥

## ८. प्रधानपूजा - ॥

पूर्णा पुष्कळाम्बासमेत श्रीहरिहरपुत्रपूजा ॥

हरिहरपुत्रगायत्र्याः दीपं प्रज्वाल्येत् ॥

भूताधिपाय विद्महे महादेवाय धीमहि ।
तन्नः शास्ता प्रचोदयात् ॥

## ८.१. पीठपूजा ॥

ॐ गुं गुरुभ्यो नमः ।
ॐ गं गणपतये नमः ।
ॐ क्षं क्षेत्रपालकाय नमः ।
ॐ सं सरस्वत्यै नमः ।
ॐ पं परमात्मने नमः ।
ॐ आधारशक्त्यै नमः ।
ॐ मूलप्रकृत्यै नमः ।
ॐ आदिकूर्माय नमः ।
ॐ आदिवराहाय नमः ।
ॐ अनन्ताय नमः ।

ॐ पृथिव्यै नमः ।
ॐ रत्नमण्डपाय नमः ।
ॐ रत्नवेदिकाय नमः ।
ॐ स्वर्णस्तम्भाय नमः ।
ॐ श्वेतच्छत्राय नमः ।
ॐ कल्पकवृक्षाय नमः ।
ॐ सितचामराभ्यां नमः ।
ॐ सपरिवाराय श्रीपूर्णापुष्कलाम्बासमेत
श्रीहरिहरपुत्रयोगपीठासनाय नमः समस्तोपचरान् समर्पयामि ॥

इति पीठपूजां समर्पयामि ॥

षोडशोपचारपूजा ।

## ८.२.ध्यानं चावाहनम् ॥

नीलाम्बरधरं देवं तेजोमण्डलमध्यकम् ।
आवहयामि शास्तारं परिवारसमन्वितम् ॥

ध्यायेन्नीलाम्बरधरं नीलमेघनिभं प्रभुम् ।
चतुर्भुजं त्रिनयनं शास्तारं सर्वसिद्धये ॥

एह्येहि पुष्कलाकान्त पूर्णेशामरवन्दित ।
मया कृतां सपर्यां त्वं सङ्गृह्य वरदो भव ॥

अत्रागच्छ जगद्वन्द्य सुरराजार्चितेश्वर ।
अनाथनाथ सर्वज्ञ गीर्वाण सुरपूजित ॥

ॐ नम॑स्ते रुद्र म॒न्यव॑ उ॒तोत॒ इष॑वे॒ नम॑ः।
नम॑स्ते अस्तु॒ धन्व॑ने बा॒हुभ्या॑मु॒त ते॒ नम॑ः॥

ॐ भूर्भुवःसुवरोम् । अस्मिन् बिम्बे वा/चित्रपठेवा/कुम्भे,वा/
पूजापीठेवा/दीपे ) साङ्गं, सायुधं,सवाहनं, सर्वशक्तियुतं, सुमुखं
सपरिवारं पूर्णापुष्कलाम्बासमेतं श्रीहरिहरपुत्रं ध्यायामि, आवाहयामि ॥

## ८.३. प्राणप्रतिष्ठा ॥

चित्रपठेवा यन्त्रे/पद्मेवा कुम्भेवा देवतां आवाहयेत् प्राणप्रतिष्ठां कृत्वा ।
ॐ अस्य श्रीहरिहरपुत्र प्राणप्रतिष्ठा महामन्त्रस्य
ब्रह्मा विष्णु महेश्वरा ऋषयः ।
ऋग्यजुस्सामाथर्वाणि छन्दाँसि ।
सकलजगत्सृष्टिस्थितिसंहारकारिणी प्राणशक्तिः परा देवता ।
आं बीजम् । ह्रीं शक्तिः । क्रों कीलकम् ।
श्रीहरिहरपुत्रप्राणप्रतिष्ठा सिद्ध्यर्थे जपे विनियोगः ॥

॥ करन्यासः ॥

आं अङ्गुष्ठाभ्यां नमः ॥

ह्रीं तर्जनीभ्यां नमः ॥

क्रों मध्यमाभ्यां नमः ॥

आं अनामिकाभ्यां नमः ॥

ह्रीं कनिष्ठिकाभ्यां नमः ॥

क्रों करतलकरपृष्ठाभ्यां नमः ॥

॥ अङ्गन्यासः ॥

आं हृदयाय नमः ॥

ह्रीं शिरसे स्वाहा ॥

क्रौं शिखायै वषट् ॥

आं कवचाय हुम् ॥

ह्रीं नेत्रत्रयाय वौषट् ॥

क्रौं अस्त्राय फट् ॥

भूर्भुवस्वरों इति दिग्बन्धः ॥

॥ ध्यानम् ॥

रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढाकराब्जैः
पाशं कोदण्डमिक्षूद्भवमळिगुणमप्यङ्कुशं पञ्चबाणान् ।

बिभ्राणासृक्कपालं त्रिनयनलसितापीनवक्षोरुहाढ्या
देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥

लं पृथ्व्यात्मिकायै गन्धं समर्पयामि ।
हं आकाशात्मिकायै पुष्पैः पूजयामि ।
यं वाय्वात्मिकायै धूपमाघ्रापयामि ।
रं अग्न्यात्मिकायै दीपं दर्शयामि ।
वं अमृतात्मिकायै अमृतमहानैवेद्यं निवेदयामि ।
सं सर्वात्मिकायै सर्वोपचारपूजां समर्पयामि ॥

आं, ह्रीं, क्रों, क्रों, ह्रीं, आम् ।
य, र, ल, व, श, ष, स, ह, हों,
हंसस्सोहं सोऽहं हंसः ॥

श्रीहरिहरपुत्रप्राणः मम प्राणः ।
श्रीहरिहरपुत्रजीवः मम जीवः ।
वाङ्मनःश्रोत्रजिह्वाघ्राणैः उच्चस्वरूपेणबहिरागत्य
अस्मिन् कुम्भे/बिम्बे (अस्मिन् कलशे अस्मिन् प्रतिमायां)
सुखं चिरं तिष्ठन्तु स्वाहा ॥

अस्यां मूर्तौ जीवस्तिष्ठतु ।
अस्यां मूर्तौ सर्वेन्द्रियाणि मनस्त्वक्चक्षुः श्रोत्रजिह्वाघ्राण-
वाक्पाणिपादपायूपस्थाख्यानिप्राणापानव्यान उदानसमानाश्चागत्य
सुखं चिरं तिष्ठन्तु स्वाहा ॥

असुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगम् ।
ज्योक् पश्येम सूर्यमुच्चरन्तमनुमते मृळया नस्स्वस्ति ॥

स्वामिन् सर्वजगन्नाथ यावत् पूजावसानकम् ।
तावत्त्वं प्रीतिभावेन प्रतिमायां/बिम्बेऽस्मिन्/ कलशेस्मिन्
सन्निधिं कुरु ॥

(आवाहनीमुद्राः प्रदर्शयेत् ।)
आवाहितो भव । स्थापितो भव । सन्निहितो भव ।
सन्निरुद्धो भव । अवकुण्ठितो भव । सुप्रीतो भव ।
सुप्रसन्नो भव । सुमुखो भव । वरदो भव ।

प्रसीद प्रसीद ॥

सुस्वागतमस्तु ॥

ॐ पूर्णापुष्कळाम्बासमेत श्रीहरिहरपुत्रस्वामिने नमः ।
प्राणान् प्रतिष्ठापयामि ॥ (यत्किञ्चित् नैवेद्यं कुर्यात् ॥)

## ८.४. आसनम् ॥

दिव्यं रत्नपरिक्षिप्तं स्वर्णसिंहासनं शुभम् ।
भक्त्या ददामि देवेश धर्मशास्त्रे नमोऽस्तुते ॥

अनेक रत्नखचितं मुक्तामणिविभूषितम् ।
रत्नसिम्हासनं चारु प्रीत्यर्थं प्रतिगृह्यताम् ॥

या त इषुः शिवतमा शिवं बभूव ते धनुः।
शिवा शरव्या या तव तया नो रुद्र मृडय ॥

ॐ अस्मिन् बिम्बे (वा/ चित्रपठे,वा/कुम्भे,वा/
पूजापीठे, वा/दीपे ) पूर्णापुष्कलाम्बासमेताय साङ्गाय,
सायुधाय, सवाहनाय, सर्वशक्तियुताय,सुमुखाय,
सपरिवाराय, सर्वात्मकाय श्रीहरिहरपुत्र स्वामिने नमः ।
रत्नखचितसिम्हासनं समर्पयामि ।

## ८.५. पाद्यम् ॥

इदं पाद्यं मयाऽऽनीतं स्वर्णपात्रसमुधृतम् ।
सङ्गृह्य तुष्टहृदयः पादप्रक्षाळनं कुरु ॥

हरिपुत्र नमस्तेऽस्तु शङ्कर प्रियनन्दन ।
भक्त्या पाद्यं मया दत्तं गृहाण जलजानन ॥

या ते रुद्र शिवा तनूरघोराऽऽपापकाशिनी ।
तया नस्तनुवा शन्तमया गिरिशन्ताभिचाकशीहि ॥

ॐ सपरिवाराय पूर्णापुष्कलाम्बासमेत
श्रीहरिहरपुत्रस्वामिने नमः । पादयोः पाद्यं समर्पयामि ।

## ८.६. अर्घ्यम् ॥

अर्घ्यं गृहाण भूतात्मन् अष्टद्रव्यसुपूरितम् ।
नमोऽस्तु देव देवेश पूर्णकामं कुरुष्व मे ॥

व्रतमुद्दिश्य विश्वेश गन्धपुष्पाक्षतैर्युतम् ।
गृहाणार्घ्यं मया दत्तं गजारूढ नमोऽस्तुते ॥

ॐ । यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे ।
शिवां गिरित्र तां कुरु मा हिँसीः पुरुषं जगत् ॥

ॐ सपरिवाराय पूर्णापुष्कलाम्बासमेत
श्रीहरिहरपुत्रस्वामिने नमः । हस्तयोः अर्घ्यं समर्पयामि ।

## ८.७. आचमनीयम् ॥

एलालवङ्गतःकोलजातीकर्पूरवासितम् ।
इदमाचमनीयं ते ददामि वननायक ॥

भूतादिनाथ सर्वज्ञ देवर्षिमुनिसेवित ।
गृहाणाचमनं देव भक्त्या दत्तं महाप्रभो ॥

ॐ । शिवेन वचसा त्वा गिरिशाच्छावदामसि ।
यथा नः सर्वमिज्जगदयक्ष्मँ सुमना असत् ॥

ॐ सपरिवाराय पूर्णापुष्कलाम्बासमेत
श्रीहरिहरपुत्रस्वामिने नमः । आचमनीयं समर्पयामि ।

## ८.८. मधुपर्कम् ॥

दधिक्षीरसमायुक्तं शर्करामधुसंयुतम् ।
मधुपर्कं मयाऽऽनीतं भूतनाथ गृहाण भो ॥

दधिक्षीरसमायुक्तं मध्वाज्येन समन्वितम् ।
मधुपर्कं गृहाणेदं गणादीश नमोऽस्तुते ॥

ॐ । अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।
अहीँश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यः ॥

ॐ सपरिवाराय पूर्णापुष्कलाम्बासमेत
श्रीहरिहरपुत्रस्वामिने नमः । मधुपर्कं समर्पयामि ।

## ८.९. पञ्चामृत (स्नानः) ॥

दिव्य पञ्चामृतमिदं फलक्षीराज्यमिश्रितम् ।
शर्करामधुसंयुक्तं स्नानार्थं प्रतिगृह्यताम् ॥

मध्वाज्यशर्करायुक्तं फलक्षीरसमन्वितम् ।
गृहाण सर्ववरद भक्तानामिष्टदायक ॥

ॐ सपरिवाराय पूर्णापुष्कलाम्बासमेत
श्रीहरिहरपुत्रस्वामिने नमः । पञ्चामृतं (स्नानं) समर्पयामि ।
अथवा पञ्चामृतं प्रोक्षयामि ।
स्नानम् ॥

गङ्गादि सर्वतीर्थेभ्यः हेमकुम्भैः समाहृतम् ।
पूतं तोयं वेदमन्त्रैः ददे स्नानाय गृह्यताम् ॥

ॐ । असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः ।
ये चेमाँ रुद्रा अभितो दिक्षु श्रिताः
सहस्रशोऽवैषाँ हेड ईमहे ॥

ॐ पूर्णापुष्कलाम्बासमेत श्रीहरिहरपुत्रस्वामिने नमः
स्नापयामि । अथवा स्नानार्थे वेदमन्त्रैश्च प्रोक्षयामि ।
(आपोहिष्ठा मयो भुवः इत्यादिभिः मन्त्रैश्च प्रोक्षयेत् ।)
भूर्भुवःसुवः ।
स्नानानन्तरं आचमनीयं समर्पयामि ।

## ८.१०. वस्त्रम् ॥

दुकूलयुगळं दिव्यं सूक्ष्मं शबरिनाथ भोः ।
सोष्णीषरत्नकवचं सङ्गृह्य कुरु मे मुदम् ॥

रक्तवस्त्रद्वयं देव देवराजसुपूजित ।
भक्त्या दत्तं गृहाणेदं नमामि हरिहरात्मज ॥

ॐ । असौ योऽवसर्पति नीलग्रीवो विलोहितः ।
उतैनं गोपा अदृशन्नदृशन्नुदहार्यः ॥
उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः ।
ॐ सपरिवाराय पूर्णापुष्कलाम्बासमेत
श्रीहरिहरपुत्रस्वामिनेनमः । वस्त्रोत्तरीयं समर्पयामि ।
रत्नकवचं समर्पयामि । उष्णीषं समर्पयामि ॥
पादप्रक्षाळनं आचमनीयं च समर्पयामि ॥

## ८.११. यज्ञोपवीतम् ॥

स्वर्ण यज्ञोपवीतं ते नवरत्नं विचित्रितम् ।
सन्धार्यतां भूतनाथ वर्चो दीर्घायुरस्तु मे ॥
राजतं ब्रह्मसूत्रञ्च काञ्चनञ्चोत्तरीयकम् ।
गृहाण सर्वधर्मज्ञ भक्तानां पशुपतेः सुत ॥
ॐ । नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ॥
अथो ये अस्य सत्वानोऽहं तेभ्योऽकरन् नमः ।
ॐ सपरिवाराय पूर्णापुष्कलाम्बा समेत
श्रीहरिहरपुत्रस्वामिने नमः ।
स्वर्ण यज्ञोपवीतं - आभरणाणि समर्पयामि ।

## ८.१२. आभरणं नानालङ्कारश्च ॥

रत्नाभरणकेयूरहारञ्च मणिभूषितम् ।
भूषणं गृह्यतां देव नमो नारायणप्रिय ॥
ॐ पूर्णापुष्कलाम्बासमेत श्रीहरिहरपुत्रस्वामिने नमः ।
स्वर्णाभरणानि समर्पयामि ।

## ८.१३. गन्धम् ॥

कस्तूरी कुङ्कुमोपेतं कर्पूरेण सुवासितम् ।
गोरोचनायुतं गन्धं सङ्गृहाण हरात्मज ॥

चन्दनागरुकर्पूरकस्तूरीकुङ्कुमान्वितम् ।
विलेपनं सुरश्रेष्ठ प्रीत्यर्थं प्रतिगृह्यताम् ॥

ॐ । प्रमुञ्च धन्वनस्त्व-मुभयोरार्त्नियोर्ज्याम् ॥

याश्च ते हस्त इषवः परा ता भगवो वप ॥

ॐ सपरिवाराय पूर्णापुष्कलाम्बासमेत
श्रीहरिहरपुत्रस्वामिने नमः । दिव्यपरिमळगन्धान् धारयामि ।
गन्धस्योपरि कुङ्कुमं धारयामि ।

## ८.१४. अक्षताः ॥

अक्षतान् कुङ्कुमोपेतान् अक्षतान् हरनन्दन ।
अक्षतान् कुरु मे कामान् गृहाणाक्षतारसम्भव ॥

अक्षतान् धवलान् दिव्यान् शालीयान् तण्डुलान् शुभान् ।
हरिद्राचूर्णसम्युक्तान् सङ्गृहाण गणाधिप ॥

ॐ पूर्णापुष्कलाम्बासमेत श्रीहरिहरपुत्रस्वामिने नमः ।
अक्षतान् समर्पयामि । विभूतिं धारयामि ।
रुद्राक्षमालिकां समर्पयामि । कण्ठमणिं समर्पयामि ॥

## ८.१५. पुष्पम् ॥

जातीचम्पकपुन्नागकुन्दमन्दारसम्भवैः ।
प्रसूनैरर्चयाम्यद्य करवीराम्बुजोत्पलैः ॥

पुन्नागैर्जातिकुसुमैः मन्दारैः पारिजातकैः ।
करवीरैर्मनोरम्यैः वकुलैः केतकैः शुभैः ॥

नीलोत्पलैश्च कल्हारैः अम्लानैश्च महेश्वर ।
कल्पितानि च माल्यानि गृहाणामरवन्दित ॥

ॐ । अवतत्य धनुस्तवँ सहस्राक्ष शतेषुधे ॥

निशीर्य शल्यानां मुखा शिवो नः सुमना भव ॥

ॐ सपरिवाराय पूर्णापुष्कलाम्बासमेत

श्रीहरिहरपुत्रस्वामिने नमः ।
नानाविधपरिमलपत्रपुष्पानि समर्पयामि ॥

## ८.१६. अथाङ्गपूजा ॥

ॐ धर्मशास्त्रे नमः पादौ पूजयामि ।
ॐ शिल्पशास्त्रे नमः गुल्फौ पूजयामि ।
ॐ वीरशास्त्रे नमः जङ्घे पूजयामि ।
ॐ महाशास्त्रे नमः जानुनी पूजयामि ।
ॐ पुत्रलाभाय नमः ऊरू पूजयामि ।
ॐ गजाधिपाय नमः गुह्यं पूजयामि ।
ॐ कालशास्त्रे नमः मेढ्रं पूजयामि ।
ॐ मदगजवाहनाय नमः नाभिं पूजयामि ।
ॐ महापापविनाशकाय नमः उदरं पूजयामि ।
ॐ शबरीगिरीशाय नमः वक्षस्थलं पूजयामि ।
ॐ सत्यरूपाय नमः पार्श्वौ पूजयामि ।
ॐ शत्रुनाशाय नमः हृदयं पूजयामि ।
ॐ मणिकण्ठाय नमः कण्ठं पूजयामि ।
ॐ विष्णुपुत्राय नमः स्कन्धौ पूजयामि ।
ॐ वरदहस्ताय नमः हस्तान् पूजयामि ।
ॐ भीमाय नमः बाहून् पूजयामि ।
ॐ अतितेजस्विने नमः मुखं पूजयामि ।
ॐ अष्टमूर्तये नमः दन्तान् पूजयामि ।
ॐ शुभवीक्षणाय नेत्रे पूजयामि ।
ॐ कोमलाङ्गाय नमः कर्णौ पूजयामि ।
ॐ त्रिपुण्ड्रधारिणे नमः ललाटं पूजयामि ।
ॐ त्रिनेत्राय नमः नासिकां पूजयामि ।
ॐ दण्डनायकाय नमः चुबुकं पूजयामि ।
ॐ ओङ्कारस्वरूपाय नमः ओष्ठौ पूजयामि ।
ॐ हरिहरात्मजाय नमः गण्डस्थलं पूजयामि ।
ॐ गणेशपूज्याय नमः कचान् पूजयामि ।
ॐ चिद्रूपाय नमः शिरः पूजयामि ।

ॐ सर्वेश्वराय नमः सर्वाण्यङ्गानि पूजयामि ॥

## ८.१७.अष्टनामावळिः ॥

ॐ भवस्य देवस्य सुताय नमः ।
ॐ शर्वस्य देवस्य सुताय नमः ।
ॐ ईशानस्य देवस्य सुताय नमः ।
ॐ पशुपतेः देवस्य सुताय नमः ।
ॐ उग्रस्य देवस्य सुताय नमः ।
ॐ रुद्रस्य देवस्य सुताय नमः ।
ॐ भीमस्य देवस्य सुताय नमः ।
ॐ महतो देवस्य सुताय नमः ॥ ८
इति अष्टनामावळिः अर्चनपूजां समर्पयामि ॥

## ८.१८. अष्टोत्तरशतनामावळि अर्चना ॥

ततः सहस्रनामावलिभिः अष्टोत्तरशतनामावलिभिः
पुष्प, दल,अक्षतार्चनं यथावकाशं कृत्वा ।
उत्तराङ्गपूजा ॥

## ८.१९. धूपदीपाराधना ॥

### ८.१९.१. धूपः ॥

अष्टगन्धसमुद्भूतं घृतगुग्गुलुसंयुतम् ।
आघ्रापयाम्यद्य धूपं स्वर्णपात्रस्थितं प्रभो ॥

दशाङ्गं गुग्गुलूपेतं सुगन्धं च मनोहरम् ।
धूपं दास्यामि देवेश गृहाण गजवाहन ॥

ॐ । धूरसि धूर्व धूर्वतं योऽस्मान्धूर्वति तं धूर्व यं वयं धूर्वामः ॥

ॐ । विज्यं धनुः कपर्दिनो विशल्यो बाणवाꣳ उत ॥

अनेशन्नस्येषव आभुरस्य निषङ्गथिः ॥

ॐ पूर्णापुष्कलाम्बासमेत सपरिवाराय
श्रीहरिहरपुत्रस्वामिने नमः । धूपमाघ्रापयामि ।

## ८.१९.२. दीपः ॥

साज्यवर्तित्रयोपेतं वह्निना योजितं मया ।
गृहाण मङ्गळं दीपं ईशपुत्र नमोऽस्तुते ॥

ॐ । या ते॑ हे॒तिर्मी॑ढुष्टम॒ हस्ते॑ ब॒भूव॑ ते॒ धनुः॑ ॥

तया॒ऽस्मान् वि॒श्वत॒स्त्वम॑य॒क्ष्मया॒ परि॑ब्भुज ॥

ॐ पूर्णापुष्कलाम्बासमेत सपरिवाराय
श्रीहरिहरपुत्रस्वामिने नमः दीपं प्रदर्शयामि ।
धूपदीपानन्तरं आचमनीयं समर्पयामि ।

## ८.१९.३. अलङ्कारदीपः ।

भूरित्य॒ग्नौ प्रति॑तिष्ठति । भुव॒ इति॑ वा॒यौ ।
सुव॒रित्या॑दि॒त्ये । मह॒ इति॒ ब्रह्म॑णि । आ॒प्नोति॒ स्वारा॑ज्यम् ।
आ॒प्नोति॒ मन॒स॒स्पति॒म् । वाक्प॑ति॒श्चक्षु॑ष्पतिः ।
श्रोत्र॑पति - र्वि॒ज्ञान॑पतिः । ए॒तत्त॑तो भवति । आ॒का॒श -
श॑रीरं॒ ब्रह्म॑ । स॒त्यात्म॑ - प्रा॒णारा॑मं॒ मन॑ आनन्दम् ।
शान्ति॑ समृ॒द्धम॒मृत॒म् ॥ इति प्राचीनयो॒ग्योपा॑स्व ॥

ॐ पूर्णापुष्कलाम्बासमेत सपरिवाराय
श्रीहरिहरपुत्रस्वामिने नमः । अलङ्कारदीपं प्रदर्शयामि ।
दीपानन्तरं आचमनीयं समर्पयामि । पुष्पैः पूजयामि ॥

## ८.१९.४. गायत्री दीपम् ।

गा॒य॒त्रो वै प॒र्णः । गा॒यत्रा॒ः । तस्मा॒त्
त्रीणि॑ त्रीणि॑ । प॒र्णस्य॑ प॒ला॒शानि॑ । त्रि॒पदा॑ गा॒यत्री ॥

ॐ पूर्णापुष्कलाम्बासमेत सपरिवाराय
श्रीहरिहरपुत्रस्वामिने नमः । गायत्रीदीपं प्रदर्शयामि ॥

आचमनीयं समर्पयामि । पुष्पैः पूजयामि ॥

## ८.१९.५. पूर्णकुम्भदीपः ।

वैराग्यतैलसम्पूर्णे भक्तिवर्तिसमन्विते ।
प्रबोधपूर्णपात्रे तु ज्ञप्तिदीपं विलोकयेत् ॥

पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

ॐ पूर्णापुष्कलाम्बासमेत सपरिवाराय
श्रीहरिहरपुत्रस्वामिने नमः । पूर्णकुम्भदीपं प्रदर्शयामि ।
आचमनीयं समर्पयामि । पुष्पैः पूजयामि ॥

## ८.२०. नैवेद्यम् ॥

स्थलशुद्धिं कृत्वा ॥

ॐ भूर्भुवःसुवः । तत्सवितुर्वरेण्यं
भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥

देवसवितः प्रसुव । सत्यं त्वर्तेन (ऋतन्त्वासत्येन) परिषिञ्चामि ।
अमृतोपस्तरणमसि ॥

प्राणाय स्वाहा ।
अपानाय स्वाहा ।
व्यानाय स्वाहा ।
उदानाय स्वाहा ।
समानाय स्वाहा ।
ब्रह्मणे स्वाहा ।
मधुवाता ऋतायते । मधुक्षरन्ति सिन्धवः ।
माध्वीर्नः सन्त्वोषधीः ।

मधुनक्तमुतोषसि । मधुमत् पार्थिवꣳ रजः ।
मधुद्यौरस्तु नः पिता । मधुमान्नो वनस्पतिः । मधुमाꣳ अस्तु सूर्यः ।
माध्वीर्गावो भवन्तु नः ॥ मधु मधु मधु ॥

शल्यान्नं सघृतं भक्ष्यं लेह्यशोष्यसमन्वितम् ।
सपेयं रत्नपात्रस्थं दधिखण्डं सपानकम् ॥

रम्भाफलं नाळिकेरं मृद्वीकं पुण्ड्रसारकम् ।
घण्डोफलासितां क्षीरं पायसं सगुळद्रवम् ॥

कपित्थं चूत पनसं बदर्यादिफलैर्युतम् ।
नैवेद्यममृतं स्वादु यथेष्टं भुञ्जतां प्रभो ॥

शाल्योदनं पायसं च मध्वपूपसमन्वितम् ।
कर्पूरचूर्णं प्रतिगृह्णीष्व नानापक्वान्नसंयुतम् ॥

नैवेद्यं षड्रसोपेतं नानाभक्ष्यसमन्वितम् ।
भूतनाथ गृहाण त्वं भक्त्या दत्तं मया प्रभो ॥

ॐ । नमस्ते अस्त्वायुधायानाततय धृष्णवे ॥

उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ॥

ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥

ओम् । पूर्णापुष्कळाम्बासमेत साङ्गाय सायुधाय सपरिवाराय सर्वात्मकाय
श्रीहरिहरपुत्रस्वामिने नमः दिव्यान्नं, घृतगुळपायसन्नाळिकेर क्षीरपायसं,
लड्डुकं, अपूपं, गुळापूपं,मोदकान्, कदळीफलानि, (नाळिकेरखण्डानि)
एतत्सर्वंयथाशक्ति महानैवेद्यं निवेदयामि । मध्ये मध्ये अमृतपानीयं
समर्पयामि । उत्तरापोषणं समर्पयामि । अमृतापिधानमसि ॥

हस्तप्रक्षालनं, पादप्रक्षालनं,
गण्डूषप्रक्षालनं, नैवेद्यानन्तरं आचमनीयञ्च समर्पयामि ।

## ८.२१. महाफलः ॥

इदं फलं मयादेव स्थापितं पुरतस्थव ।
तेन मे सफलावाप्तिर्भवेत् जन्मनि जन्मनि ॥

ॐ पूर्णापुष्कलाम्बासमेतश्रीहरिहरपुत्रस्वामिने नमः ।
महाफलं समर्पयामि ।

## ८.२२. ताम्बूलम् ॥

जातीलवङ्गसहितं चूर्णकर्पूरसंयुतम् ।
ताम्बूलं प्रतिगृह्याद्य मत्कामं परिपूरय ॥

फूगीफल समायुक्तं नागवल्ली दलैर्युतम् ।
कर्पूरचूर्ण सम्युक्तं ताम्बूलं प्रतिगृह्यताम् ॥

ॐ । परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः ॥

अथो य इषुधिस्तवारे अस्मन्निधेहि तम् ॥

ॐ पूर्णापुष्कलाम्बासमेतश्रीहरिहरपुत्रस्वामिने नमः
कर्पूरताम्बूलं समर्पयामि ।

## ८.२३. पञ्चमुखदीपः ॥

पञ्चवर्तिसमायुक्तं पञ्चपातकनाशनम् ।
पञ्चास्यदीपं दास्यामि भूतनाथ नमोऽस्तुते ॥

ॐ । पञ्च हूतो हवै नामैषः । तं वा एतं पञ्च हूतꣳ सन्तम् ।
पञ्चहोतेत्याचक्षते परोक्षेण । परोक्षप्रिया इव हि देवाः ॥

ॐ । स प्रथ सभां मे गोपाय ।
ये च सभ्याः सभासदः ।
तानिन्द्रियवतः कुरु । सर्वमायुरुपासताम् ।
अहे/’ बुध्निय मन्त्रं मे गोपाय ।
यं ऋषयस्त्रयीविद विदुः ।
ऋचस्सामानि यजूꣳषि ।
सा हि श्रीरमृता सताम् ॥

ॐ पूर्णापुष्कलाम्बासमेतश्रीहरिहरपुत्रस्वामिने नमः ।
पञ्चमुखदीपं प्रदर्शयामि । आचमनीयं समर्पयामि ॥

## ८.२४. कर्पूरनीराजनदीपः ॥

नीराजनं सुमाङ्गल्यं सर्वमङ्गलकारणम् ।
गृहाण परया भक्त्याचार्पितं ते शिवात्मज ॥

नीराजनं सुमाङ्गल्यं कर्पूरेण कृतं मया ।
गृहाण करुणाराशे भूतनाथ नमोऽस्तुते ॥

सुगन्धकुसुमैर्दिव्यैः भक्त्या परमया युतैः ।
नीराजनं विधास्यामि सन्तुष्टस्त्वं विलोकय ॥

न तत्र सूर्यो भाति न चन्द्रतारकं
नेमा विद्युतो भान्ति कुतोऽयमग्निः ।
तमेव भान्त-मनुभाति सर्वं
तस्य भासा सर्वमिदं विभाति ॥

न तद्भासयते सूर्यो न शशाङ्को न पावकः ।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥

ॐ राजाधिराजाय॑ प्रसह्य सा॒हिने᳚ ,
नमो॑ व॒यं वै᳚श्रव॒णाय॑कुर्महे ।
स मे॒ कामा॒न्काम॒ कामा॑य॒ मह्यं᳚,
का॒मे॒श्व॒रोवै᳚श्रव॒णो द॑धातु ॥
कु॒बे॒राय॑ वैश्रव॒णाय॑म॒हा॒रा॒जा॒य॒ नमः॑ ॥

ॐ सपरिवाराय पूर्णापुष्कलाम्बासमेतश्रीहरिहरपुत्रस्वामिने
नमः । समस्तमपराधशमनार्थं, सर्वपापक्षयार्थं,
कर्पूरनीराजनदीपं प्रदर्शयामि अक्षां धारयामि ।
नीराजनानन्तरं आचमनीयं समर्पयामि ।

## ८.२५.प्रदक्षिण नमस्कारः ॥

यानि कानि च पापानि जन्मान्तरकृतानिच ।
तानि तानि विनश्यन्ति प्रदक्षिण पदे पदे ॥

प्रकृष्टपापनाशाय प्रकृष्टफलसिद्धये ।
प्रदक्षिणं करोमीश प्रसीद पुरुषोत्तम ॥

भूतनाथ सदानन्द सर्वभूतदयापर ।
रक्ष रक्ष महाबाहो शास्त्रे तुभ्यं नमो नमः ॥

भूतनाथ विशालाक्ष सर्वाभीष्टफलप्रद ।
प्रदक्षिणं करोमि त्वां सर्वान् कामान् प्रयच्छ मे ॥

लोकवीर्यं महापूज्यं सर्वरक्षाकरं विभुम् ।
पार्वतीहृदयानन्दं शास्तारं प्रणमाम्यहम् ॥

विप्रपूज्यं विश्ववन्द्यं विष्णुशम्भ्वोः प्रियं सुतम् ।
क्षिप्रप्रसादनिरतं शास्तारं प्रणमाम्यहम् ॥

मत्तमातङ्गगमनं कारुण्यामृतपूरितम् ।
सर्वविघ्नहरं देवं शास्तारं प्रणमाम्यहम् ॥

अस्मत्कुलेश्वरं देवमस्मच्छत्रुविनाशनम् ।
अस्मदिष्टप्रदातारं शास्तारं प्रणमाम्यहम् ॥

पाण्ड्येशवंशतिलकं केरळे केळिविग्रहम् ।
आर्तत्राणपरं देवं शास्तारं प्रणमाम्यहम् ॥

अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात्कारुण्यभावेन रक्ष रक्ष महाप्रभो ॥

ॐ पूर्णापुष्कलाम्बासमेतश्रीहरिहरपुत्रस्वामिने नमः ।
अनन्तकोटि प्रदक्षिणनमस्काराश्च समर्पयामि ।

## ८.२६. मन्त्र पुष्पः ॥

जातीचम्पकपुन्नागमल्लिकावकुलादिभिः ।
पुष्पाञ्जलिं प्रदास्यामि गृहाण द्विरदानन ॥

जातीपङ्कजपुन्नागमल्लिकावकुळादिभिः ।
पुष्पाञ्जलिं प्रदास्यामि भूतनाथ प्रगृह्यताम् ॥

यो दे॒वानां᳚ प्रथ॒मं पु॒रस्ता॒द्विश्वा॒ धि॒यो॑रु॒द्रो म॒हर्षि॑ः ।
हि॒र॒ण्य॒ग॒र्भं प॑श्यतजायमा॒नँ स नो॑ दे॒वश्शु॒भया॒ स्मृत्या॒ः संयु॑नक्तु ।

यस्मात् परन्नापरमस्ति किञ्चिद्यस्मान्नाणीयो नज्यायोऽस्ति कश्चित् ।
वृक्ष इव स्तब्धोदिवितिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् ।
न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः
परेण नाकं निहितं गुहायां विभ्राजदे यद्यतयो विशन्ति ।
वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयःशुद्धसत्त्वाः
ते ब्रह्मलोके तु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे ॥

दह्रं विपापं परमेश्मभूतं यत्पुण्डरीकम्पुरमध्यसꣳस्थम् ।
तत्रापि दह्रं गगनं विशोकं तस्मिन् यदन्तस्तदुपासितव्यम् ॥

यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ॥

योऽपां पुष्पं वेद। पुष्पवान् प्रजावान् पशुमान् भवति ।
चन्द्रमा वा अपां पुष्पम् । पुष्पवान् प्रजावान् पशुमान् भवति ।
य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ॥

ॐ पूर्णापुष्कलाम्बासमेतश्रीहरिहरपुत्रस्वामिने नमः ।
वेदोक्तमन्त्रपुष्पं समर्पयामि ॥

## ८.२७. राजोपचारः ॥

गृहाण पुष्कळाकान्त सरत्ने छत्रचामरे ।
दर्पणं व्यञ्जनं चैव राजभोगाय यत्नतः ॥

देवदेवोत्तम देवता सार्वभौम,
अखिलाण्डकोटि ब्रह्माण्डनायक,
पूर्णापुष्कलाम्बासमेतसपरिवार
श्रीहरिहरपुत्रमहाप्रभो छत्रचामरादि
राजोपचारान् अवधारय ।
छत्रं धारयामि ।
चामरं वीजयामि ।
व्यजनं वीजयामि ।
गीतं श्रावयामि ।

वाद्यं घोषयामि ।
नृत्यं दर्शयामि ।
पद्यं वाचयामि ।
दर्पणं दर्शयामि ।
आन्दोलिकान् आरोहयामि ।
अश्वानारोहयामि ।
गजानारोहयामि ।
रथानारोहयामि ।
समस्त मन्त्र, राजोपचार, देवोपचार, भक्त्युपचाराश्च समर्पयामि ॥

## ८.२८.वेदपारायणः ॥

देवदेवोत्तम देवतासार्वभौम, अखिलाण्डकोटिब्रह्माण्डनायक,
पूर्णापुष्कलाम्बासमेत श्रीहरिहरपुत्र महाप्रभो ।
वेदप्रिय चतुर्वेदपारायणं अवधारय ।
हरिः ॐ । अ॒ग्निमी॑ळे पु॒रोहि॑तं य॒ज्ञस्य॑ दे॒वमृ॒त्विज॑म् ।
होता॑रं रत्न॒धात॑मम् ॥ हरिः ॐ ।
हरिः ॐ इ॒षे त्वो॒र्जे त्वा॑ वा॒यव॑स्थोपा॒यव॑स्थ दे॒वो
वः॑ सवि॒ता प्रार्प॑यतु॒ श्रेष्ठ॑तमाय॒ कर्म॑णे । हरिः ॐ ।
हरिः ॐ । अग्न॒ आया॑हि वी॒तये॑गृणा॒नो ह॒व्यदा॑तये ।
निहोता॑ सत्सि ब॒र्हिषि॑॥ हरिः ॐ ।
हरिः ॐ । शन्नो॑ दे॒वीर॒भिष्ट॑य॒ आपो॑भवन्तु पी॒तये॑।
शंयो॒रभिस्र॑वन्तु नः ॥ हरिः ॐ ।
ॐ पूर्णापुष्कलाम्बासमेतश्रीहरिहरपुत्रस्वामिने नमः ।
चतुर्वेदपारायणं समर्पयामि ।

## ८.२९. क्षीरार्घ्यप्रदानः ॥

अद्य पूर्वोक्तविशेषणविशिष्टायांशुभतिथौ
सपरिवार श्रीहरिहरपुत्रप्रसादसिद्ध्यर्थं
मया कृतश्रीहरिहरपुत्रपूजाकर्मणः सम्पूर्णफलसिद्ध्यर्थं

श्रीहरिहरपुत्रपूजान्ते क्षीरार्घ्य प्रदानं करिष्ये ॥ (अप उपस्पृश्य ।)
(अक्षत, गन्ध, पुष्प क्षीरं सहितं हस्ते गृहीत्वा क्षीरार्घ्यं दद्यात् ॥)
अर्घ्यं गृहाण भूतेश वरप्रद हरात्मज ।
गन्धपुष्पाक्षतैर्युक्तं भक्त्यादत्तं मया प्रभो ॥

सपरिवाराय श्रीहरिहापुत्राय नमः । इदमर्घ्यं इदमर्घ्यं इदमर्घ्यम् ॥

आर्याय च शरण्याय भूतनाथाय ते नमः ।
पुनरर्घ्यं प्रदास्यामि भूतनाथ नमोऽस्तुते ॥

सपरिवाराय श्रीहरिहापुत्राय नमः ।
इदमर्घ्यं इदमर्घ्यं इदमर्घ्यम् ॥

अनेन क्षीरार्घ्यप्रदानेन भगवान् सर्वदेवात्मकः
श्रीहरिहरपुत्रः प्रीयताम् ॥

## ८.३०.प्रार्थना ॥

भूताधिपाय वि॒द्मह॑े महा॒देवाय॑ धीमहि ।
तन्न॑ः शास्ता प्रचो॒दया॑त् ॥

भूतनाथ दयासिन्धो देहि मे वरमीप्सितम् ।
त्वयि भक्तिं परां देहि पुत्रपौत्रांश्च सम्पदः ॥

आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजाविधिं न जानामि क्षमस्व करुणानिधे ॥

भूतनाथ जगन्नाथ दयाळो देहि मे प्रभो ।
आयुर्वित्तं च सत्कीर्तिं भक्तिं त्वय्यचलां श्रियम् ॥

आश्यामकोमलविशालतनुं विचित्र-
वासोवसानमरुणोत्पलदामहस्तम् ।
उत्तुङ्गरत्नमकुटं कुटिलाग्रकेशं
शास्तारमिष्टवरदं शरणं प्रपद्ये ॥

करचरणकृतं वाक्कायजं कर्मजं वा
श्रवणनयनजं वा मानसं वापराधम् ।
विहितमविहितं वा सर्वमेतत्क्षमस्व

हरिहरसुतदेव त्राहि मां भूतनाथ ॥

समस्तोपचारान् समर्पयामि ॥

स्वस्ति प्रजाभ्यः परिपालयन्तां
न्याय्येन मार्गेण महीं महीशाः ।
गोब्रह्मणेभ्यः शुभमस्तु नित्यं
लोकाः समस्ताः सुखिनो भवन्तु ॥

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमिति मां मत्वा क्षमस्व करुणानिधे ॥

अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात्कारुण्यभावेन रक्ष रक्ष महाप्रभो ॥

अनेन मया यथाज्ञेन यथाशक्त्या यथामिलितोपचारद्रव्यैः
कृतपूजाविधानेन (भाजनेन) भगवान्सर्वात्मकः
विघ्नेश्वर-दुर्गापरमेश्वरीसहितः पूर्णापुष्कलाम्बासमेत
श्रीहरिहरपुत्रस्वामिन् सपरिवारः सुप्रीतः सुप्रसन्नो वरदो
भूत्वा मम (अस्य यजमानस्य) सहकुटुम्बस्य (सहपुत्रकस्य
सहपुत्रीकस्य सहभ्रातृकस्य सहाश्रितबन्धुवर्गस्य)
च सर्वषां क्षेमस्थैर्यवीर्यविजयायुरारोग्यैश्वर्याणां
अभिवृद्धिप्रदः शत्रुबाधानिवृत्तिप्रदः सत्सन्तानाभिवृद्धिप्रदः
सर्वाभीष्टसिद्धिप्रदश्च भूयातिति भवन्तोऽनुगृह्णन्तु -
तथास्तु । सर्वेजनाः सुखिनो भवन्तु । उत्तरोत्तराभिवृद्धिरस्तु ॥

## ८.३१.उपायनदानम् ॥

अद्य पूर्वोक्तविशेषणविशिष्टायां अस्यां शुभतिथौ मया कृतं सपरिवार
श्रीहरिहरपुत्रपूजाकर्मसाद्गुण्यार्थं श्रीहरिहरपुत्रप्रीत्यर्थं
उपायनदानं ब्राह्मणपूजां च करिष्ये ॥ अप उपस्पृश्य ॥

श्रीहरिहरपुत्रस्वरूपस्य ब्राह्मणास्य इदमासनम् ॥

(आच्छादनार्थं सोत्तरीयं इदं वस्त्रं) अमी ते गन्धाः ।
नानालङ्कारार्थे अक्षतान् समर्पयामि । सकलारधनैः स्वर्चितम् ॥

हिरण्यगर्भगर्भस्तं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदं अतः शान्तिं प्रयच्छ मे ॥

भूतेशः प्रतिगृह्णाति भूतेशो वै ददाति च
भूतेशस्तारको द्वाभ्यां भूतेशाय नमो नमः ॥

भक्ष्यभोज्यसमायुक्तं मोदकैश्च समन्वितम् ।
अपूपैश्च समोपेतमुपायनं ददाम्यहम् ॥

मयाकृतश्रीहरिहरपुत्रपूजाकर्मणः साङ्गफलसिद्ध्यर्थं
श्रीहरिहरपुत्रप्रीत्यर्थं इदमुपायनं सदक्षिणाकं सताम्बूलं
(सपात्रं) श्रीहरिहरपुत्रप्रीतिं कामायमानः तुभ्यमहं सम्प्रददे ॥

ॐ तत्सत् ॥ (प्रदक्षिणनमस्कारान् कुर्यात्) ॥

## ८.३२. निर्माल्यमहानैवेद्यम् ॥

दिव्यगन्धमयैः पुष्पैः फललड्डुकमोदकैः ।
हस्तिनं पूजयाम्यद्य सभक्तीष्टफलाप्तये ॥

श्रीहरिहरपुत्रवाहनाय मदगजाय नमः । निर्माल्यं
महानैवेद्यं निवेदयामि । आचमनीयं समर्पयामि ॥

## ८.३३. क्षमायाचनम् ॥

यदुद्दिश्य कृतं देव यथाशक्ति मयाऽर्चनम् ।
तेन तुष्टो भवाद्याशु हृत्स्थान् कमांश्च पूरय ॥

अबद्धमतिरिक्तां वा द्रव्यहीनं मया कृतम् ।
तत्सर्वं पूर्णतां यातु पुष्कलेशनमोऽस्तुते ॥

यद्दत्तं भक्तिमार्गेण पत्रं पुष्पं फलं जलम् ।
निवेदितं च नैवेद्यं त्वं गृहाणानुकम्पया ॥

नानायोनिसहस्रेषु येषु येषु प्रजाम्यहम् ।
तेषु तेष्वच्युतं भक्तिः भवेत्त्वयि सदा मम ॥

देवो दाता च भोक्ता च देवः सर्वमिदं जगत् ।

देवो जगति सर्वत्र सदेवः सोऽहमेव च ॥

अज्ञानादल्पबुद्धित्वात् आलस्याद्दुष्टसङ्गमात् ।
कृतापराधं कृपणं क्षन्तुमर्हसि मां प्रभो ॥

## ८.३४.भजनघोषम् ॥

(अनन्तरं शरण्यं शरणदतारं अय्यप्पनामकं शास्तारं
श्रीहरिहरपुत्रं शरणाह्वानरूपभजनस्तोत्रेण सन्तोषयेत् ।)
ब्रह्मार्पणमस्तु ॥

## ८.३५. आचमनम् ॥

ॐ अच्युताय नमः । ॐ अनन्ताय नमः । ॐ गोविन्दाय नमः ॥

## ८.३६. आत्मसमर्पणम् ॥

यस्य स्मृत्या च नाम्नोक्त्या तपः पूजा क्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

अपराधसहस्राणि क्रियन्ते अहर्निशं मया ।
तानि सर्वाणि मे देव क्षमस्व पुरुषोत्तम ॥

प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
तन्नामस्मरणाद्विष्णोः सम्पूर्णं स्यादिश्रुतिः ॥

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेस्स्वभावात् ।
करोमि यद्यत्सकलं परस्मैनारायणायेति समर्पयामि ॥

मयाकृतमिदं भगवान् सर्वात्मकः पूर्णापुष्कलाम्बा समेत
श्रीहरिहरपुत्रस्वामिनः प्रीतयेपूजाख्यं कर्म ॐ तत्सत् ब्रह्मार्पणमस्तु ॥

## ८.३७. प्रसादग्रहणम् ॥

ॐ श्रीहरिहरपुत्रप्रसादं शिरसा गृह्णामि ॥

## ८.३८. रात्रिकम् ।

चक्षुर्धनं सर्वलोकानां तिमिरस्य निवारणम् ।
आरात्रिकं प्रयच्छामि प्रीतो भव दयानिधे ॥

इति आरात्रिकं कृत्वा ॥

## ८.३९.बिम्बे/चित्रपठे/कुम्भे/यन्त्रेवा आवाहिताः देवताः विसृज्य -

दीपेन विसर्जयेत् । अस्मिन् दीपे श्रीमहागणपतये नमः ।
अस्मिन् दीपे श्रीदुर्गापरमेश्वर्यै नमः । अस्मिन्
महाभद्रदीपे सपरिवाराय पूर्णापुष्कळाम्बासमेत सपरिवाराय
श्रीहरिहरपुत्राय नमः । समस्तोपचारपूजां समर्पयामि ॥

(दीक्षितस्य उपासकेन ऋषिछन्दो देवता
ध्यानपूर्वं मूलमन्त्रं किञ्चित् जपित्वा पुष्पाक्षतान् गृहीत्वा )।
ॐ । परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः ॥

अथो य इषुधिस्तवारे अस्मन्निधेहि तम् ॥

ॐ भूर्भुवस्सुवरों अस्मात्(विग्रहात्,/बिम्बात्, चक्रात् ,चित्रपठात्)
आवाहितंसपरिवारं श्रीहरिहरपुत्रं यथास्थानं प्रतिष्ठापयामि ॥

ॐ गणानां त्वा गणपतिँ हवामहे
कविङ्कवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजंब्रह्मणां ब्रह्मणस्पत आ नः
शृण्वन्नूतिभिस्सीद सादनम् ॥

ॐ । भूर्भुवस्सुवरों अस्मात् (कुम्भात्,/बिम्बात्, चक्रात् ,चित्रपठात्)
आवाहितं सपरिवारं महागणपतिं यथास्थानं प्रतिष्ठापयामि ।
ॐ । जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः ।
सनः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुंदुरिताऽत्यग्निः ॥

ॐ । भूर्भुवस्सुवरों अस्मात्
(कुम्भात्, बिम्बात्, चक्रात् ,चित्रपठात्)
आवाहितां दुर्गापरमेश्वरीं यथास्थानं प्रतिष्ठापयामि ।

शोभनार्थे क्षेमाय पुनरागमनाय च ।
(तीर्थप्रसादनिषेवणं कृत्वा ।
इष्टमित्रबन्धुजनैः सह भुञ्जीत ॥)

## ८.४०. शङ्ख भ्रमणः ॥

शङ्खमध्य स्थितं तोयं भ्रामितं दैवतोपरि ।
अङ्गलग्नं मनुष्याणां ब्रह्महत्या व्यपोहनम् ॥

(शङ्खं उद्धृत्य आवाहित देवतानामुपरि त्रिः
परिभ्राम्य तज्जलं हस्ते समादाय प्रोक्षयेत्) ॥

## ८.४१. तीर्थप्राशनमन्त्रः ॥

अकालमृत्युहरणं सर्वव्याधिनिवारणम् ।
सर्वपापक्षयकरं शास्ता पादोदकं शुभम् ॥

(इति अभिषेकतीर्थं प्राश्य)

इति श्रीहरिहरपुत्र अथवा शास्ता अथवा शबरिगिरीशाभिन्न पूजाविधिः समाप्ता ।

Encoded by Antaratma antaratma at Safe-mail.net

Proofread by Antaratma, PSA Easwaran

*shrIhariharaputra shAstA shabarigirIshAbhinna pUjA vidhi*

pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*